# bhagavad-sahasranAmAvali (dramiDopaniShad tAtparya ratnAvali)

# भगवन्नामसहस्रम्

## Document Information

Text title : bhagavannAmasahasram

File name : bhagavannaamasahasram.itx

Category : sahasranAmAvalI, vishhnu, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : Shri Vedanta Deshika

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Feb 16, 2015, Feb 2, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# भगवन्नामसहस्त्रम्

॥ श्रीः ॥

॥ भगवत्सहस्रनामावलिः ॥

## परः

ॐ निस्सीमोद्यद्गुणाय नमः ।
ॐ अमितरसाय नमः ।
ॐ अनन्तलीलास्पदाय नमः ।
ॐ स्वायत्ताशेषसत्ताय नमः ।
ॐ स्वायत्ताशेषस्थितये नमः ।
ॐ स्वायत्ताशेषयतनभिदावैभवाय नमः ।
ॐ विश्वरूपाय नमः ।
ॐ त्र्यक्षब्रह्मात्मने नमः ।
ॐ सदसदवगताय नमः ।
ॐ सर्वतत्त्वेषु पूर्णाय नमः । १०।

## अखिलसमः

ॐ स्वामिने नमः ।
ॐ सुस्थिराय नमः ।
ॐ निखिलनिर्पधिस्वात्मविग्रहाय नमः ।
ॐ तादृक्सर्वानुकूलाय नमः ।
ॐ च्यवनवदितरप्राप्यवैषम्यवते नमः ।

ॐ सर्वत्रापक्षपाताय नमः ।
ॐ शुभविभवाय नमः ।
ॐ मानसाद्यर्चाय नमः ।
ॐ सङ्कोचोन्मोचकाय नमः ।
ॐ जगदवनाय नमः । २०।

## भक्तसुलभः

ॐ स्वभक्तैर्बन्ध्यार्हाय नमः ।
ॐ अधिकतरगुणानन्तदिव्यावताराय नमः ।
ॐ सर्वेष्वासक्तिमते नमः ।
ॐ नतसुगमाय नमः ।
ॐ स्वप्रबोधप्रदाय नमः ।
ॐ ख्याताभिख्यादिचिह्नाय नमः ।
ॐ स्वरुचिवितरणाय नमः ।
ॐ सर्वकालाश्रयाय नमः ।
ॐ शर्वादेः स्वाङ्गदात्रे नमः ।
ॐ प्रहितप्रदाय नमः । ३०।

## निःशेषागस्सहः

ॐ त्राणे बद्धध्वजाय नमः ।
ॐ शुभनयनाय नमः ।
ॐ स्वार्तलाभेऽर्थिने नमः ।
ॐ तिम्यन्मेघस्वभावाय नमः ।
ॐ जगदुपजननस्थापनातिप्रियाय नमः ।
ॐ कारुण्याप्तत्वयोगाय नमः ।
ॐ अनुगतमहिषीसंनिधये नमः ।
ॐ दीर्घसङ्गाय नमः ।
ॐ नानाबन्धाय नमः ।
ॐ स्वरक्षावहिततमाय नमः । ४०।

## सुशीलः

ॐ क्षुद्राह्वानाभिमुख्याय नमः ।
ॐ निजमहिमतिरस्कारकार्चाप्रियाय नमः ।
ॐ सर्वत्राप्यङ्घ्रिदात्रे नमः ।
ॐ सविधशयनाय नमः ।
ॐ स्वाङ्घ्रिसक्तैकरसाय नमः ।
ॐ गोपाद्याप्ताय नमः ।
ॐ अशेषेक्षणविषयाय नमः ।
ॐ भक्तवस्तुप्रसक्ताय नमः ।
ॐ श्लिष्यन्नाशव्यपोहाय नमः ।
ॐ तदहितशमनाय नमः । ५०।
ॐ अकीर्तैरर्च्याय नमः ।
ॐ अनियतविविधाभ्यर्चनाय नमः ।
ॐ अल्पतुष्टाय नमः ।
ॐ प्रह्वार्जेशाय नमः ।
ॐ स्वविषयनियतेष्वादरवते नमः ।
ॐ स्वादुभूम्ने नमः ।
ॐ पादासक्तप्रसन्नाय नमः ।
ॐ सकृदुपसदने मोक्षणाय नमः ।
ॐ धर्मसुस्थाय नमः ।
ॐ क्षिप्रक्ष्ताहिताय नमः । ६०।

## सरसभजनः

ॐ सच्चित्ताकर्षहेतये नमः ।
ॐ अघशमननिधये नमः ।
ॐ नित्यभोग्यामृताय नमः ।
ॐ त्यागे हेतूज्झिताय नमः ।

ॐ प्रबहृदुपकृतये नमः ।
ॐ दुस्त्यजस्वानुभूतये नमः ।
ॐ त्यागाकाङ्क्षानिरोद्ध्रे नमः ।
ॐ श्रितहृदयपृथक्कारनित्याक्षमाय नमः ।
ॐ स्वात्मश्लिष्टाय नमः ।
ॐ गयच्छ्रमहरयशसे नमः । ७०।

## प्रकृति ऋजुः

ॐ सूरीणां स्वैरसेव्याय नमः ।
ॐ स्वयमवतरते नमः ।
ॐ क्षुद्रदिव्यैकनेत्राय नमः ।
ॐ गोपाद्यर्थघृताद्रये नमः ।
ॐ क्षिततनुरसिकाय नमः ।
ॐ वामनीभावदृश्याय नमः ।
ॐ सच्चित्तानन्यवृत्तये नमः ।
ॐ विभवसमतनवे नमः ।
ॐ स्वायुधारूढहस्ताय नमः ।
ॐ नीचोच्चग्राह्यपादाय नमः । ८०।

## सात्म्यभोगप्रदः

ॐ पर्यन्ते दृष्टाय नमः ।
ॐ अत्के दृष्टाय नमः ।
ॐ स्वविरहविधुराय नमः ।
ॐ डिम्भवत् पार्श्वलीनाय नमः ।
ॐ चित्ते क्लृप्तप्रवेशाय नमः ।
ॐ भुजशिखरगताय नमः ।
ॐ तालुसिंहासनस्थाय नमः ।
ॐ चक्षुर्मध्ये निविष्टाय नमः ।
ॐ अलिकतटे स्थिताय नमः ।

ॐ मस्तके तस्थुषे नमः । ९०।

## अव्याजोदारः

ॐ विष्वग्विक्रान्तिदृश्याय नमः ।
ॐ विगणनसुलभाय नमः ।
ॐ व्यक्तपूर्वोपकाराय नमः ।
ॐ स्वान्तस्यैकाग्र्यहेतवे नमः ।
ॐ स्वयमुदयजुषे नमः ।
ॐ बन्धमात्रोपयाताय नमः ।
ॐ चिन्तास्तुत्यादिलक्ष्याय नमः ।
ॐ नतजनसततश्लेषिणे नमः ।
ॐ दर्शितार्चाय नमः ।
ॐ स्मृत्यै चित्ते मिषते नमः । १००।

## असह्यक्षणविरहः

ॐ निद्राविच्छेदकाय नमः ।
ॐ अरतिजनकाय नमः ।
ॐ अजस्रसंक्षोभकाय नमः ।
ॐ अन्वेष्टुं प्रेरकाय नमः ।
ॐ विलयवितरणाय नमः ।
ॐ कार्श्यदैन्यादिकृते नमः ।
ॐ चित्ताक्षेपकाय नमः ।
ॐ विसंज्ञीकरणाय नमः ।
ॐ उपसंशोषकाय नमः ।
ॐ आवर्जकाय नमः । ११०।

## उत्तुङ्ग ललितः

ॐ पूर्णैश्वर्यावताराय नमः ।
ॐ भवदुरितहराय नमः ।
ॐ वामनत्वे  महते नमः ।
ॐ नाभीपद्मोत्थविश्वाय नमः ।
ॐ तदनुगुणदृशे नमः ।
ॐ कल्पतल्पीकृताब्धये नमः ।
ॐ न्यग्रोधपत्रे सुप्ताय नमः ।
ॐ जगदवनधिये नमः ।
ॐ रक्षणायावतीर्णाय नमः ।
ॐ रुद्रादिस्तुत्यलीलाय नमः । १२०।

## सर्वास्वादः

ॐ चित्रास्वादानुभूतये नमः ।
ॐ उपकृतिभिः नमः ।
ॐ दास्यसारस्यहेतवे नमः ।
ॐ स्वात्मन्यासार्हकृत्याय नमः ।
ॐ भजदमृतरसाय नमः ।
ॐ भक्तचित्तैकभोग्याय नमः ।
ॐ सर्वाक्षप्रीणनार्हाय नमः ।
ॐ सम्पदि बहुफलस्नेहाय नमः ।
ॐ आस्वाद्यशीलाय नमः ।
ॐ सभ्यैस्साध्यैस्समेताय नमः । १३०।

## व्यसनहरः

ॐ प्रह्लादार्थे नृसिंहाय नमः ।
ॐ क्षपितविपदुषावल्लभाय नमः ।
ॐ क्षिप्तलङ्काय नमः ।
ॐ क्ष्वेलप्रत्यर्थिकेतवे नमः ।

ॐ श्रमहरतुलसीमालिने नमः ।
ॐ धैर्यहेतवे नमः ।
ॐ त्राणे दत्तावधानाय नमः ।
ॐ स्वरिपुहतिकृताश्वासनाय नमः ।
ॐ दीप्तहेतये नमः ।
ॐ सत्प्रेक्षारक्षित्रे नमः । १४०।

## स्वाप्तिसम्प्रीतिमान्

ॐ स्वप्राप्त्या सिद्धकान्तये नमः ।
ॐ सुघटितदयिताय नमः ।
ॐ विस्फुरत्तुङ्गमूर्तये नमः ।
ॐ प्रीत्युमेषातिभोग्याय नमः ।
ॐ नवघनसुरसाय नमः ।
ॐ नैकभूषादिदृश्याय नमः ।
ॐ प्रख्यातप्रीतिलीलाय नमः ।
ॐ दुरभिलपरसाय नमः ।
ॐ सद्गुणामोदहृद्याय नमः ।
ॐ विश्वव्यावृत्तिचित्राय नमः । १५०।

## स्वविरहचकितः

ॐ स्वास्वादख्यापकाय नमः ।
ॐ श्रितनियतदृशये नमः ।
ॐ नैकभोगप्रदाय नमः ।
ॐ त्यागानर्हप्रकाशाय नमः ।
ॐ स्थिरपरिचरणस्थापकाय नमः ।
ॐ पापभञ्जकाय नमः ।
ॐ दुस्साधार्थसाधकाय नमः ।
ॐ विरहभयकृते नमः ।
ॐ दुर्विभेदात्मयोगाय नमः ।

ॐ नित्यानेकोपकाराय नमः । १६०।

## स्वजनहितः

ॐ सर्वादये नमः ।
ॐ सर्वनाथाय नमः ।
ॐ त्रिभुवनजननीवल्लभाय नमः ।
ॐ स्वाश्रितार्थिने नमः ।
ॐ विष्वग्व्याप्त्यातिदीप्ताय नमः ।
ॐ विमतनिरसनाय नमः ।
ॐ स्वाङ्घ्रिसद्भक्तिदायिने नमः ।
ॐ विश्वाप्त्यै वामनाङ्गाय नमः ।
ॐ स्वविभवरसदाय नमः ।
ॐ स्वान्तनिर्वाहयोग्याय नमः । १७०।
ॐ स्वार्थेहाय नमः ।
ॐ बन्धमोक्त्रे नमः ।

## मुक्तिरसदः

ॐ प्राप्याकारोपपन्नाय नमः ।
ॐ जनिपरिहरणाय नमः ।
ॐ विश्वसृष्ट्यादिशक्तये नमः ।
ॐ निस्सीमानन्ददेशन्विताय नमः ।
ॐ रक्षणार्थावताराय नमः ।
ॐ सुप्रख्यातानुभवाय नमः ।
ॐ विविधविहरणाय नमः ।
ॐ व्याप्तिवैचित्र्यवते नमः । १८०।
ॐ भक्तैर्द्राग्दृश्याय नमः ।
ॐ अखिलफलकृते नमः ।

## स्वकैङ्कर्योद्दिश्यः

ॐ श्रद्धेयस्वाङ्घ्रिओगाय नमः ।
ॐ शुभमतिकरदाय नमः ।
ॐ स्तोत्रसामर्थ्यहेतवे नमः ।
ॐ स्वार्थीकारोपकाराय नमः ।
ॐ स्मृतिरसशमितान्यादराय नमः ।
ॐ प्रीतिवश्याय नमः ।
ॐ प्राप्तौ कालाक्षमत्वप्रदाय नमः ।
ॐ अमृतरसध्यानाय नमः । १९०।
ॐ आत्मार्पणार्हाय नमः ।
ॐ वैमुख्याद्वारयते नमः ।

## सुभसविधगिरिस्थः

ॐ दीप्ताश्चर्यस्वभावाय नमः ।
ॐ मुखरितजलजाय नमः ।
ॐ वर्षुकाम्भोदवर्णाय नमः ।
ॐ शैलच्छत्राभिगुप्ताश्रिताय नमः ।
ॐ अतिविलसद्धेतये नमः ।
ॐ आपीतगव्याय नमः ।
ॐ संरंभोत्क्षिप्तभूमये नमः ।
ॐ प्रणमदनुगुणाय नमः । २००।
ॐ पूतनाचेतनान्ताय नमः ।
ॐ श्रुतीनां पूर्वाचार्याय नमः ।

## विचित्रसौन्दर्ययुक्तः

ॐ अङ्गैः सुश्लिष्टाकल्पाय नमः ।
ॐ अनुपमसुषमाय नमः ।
ॐ निस्सीमदीप्तये नमः ।

ॐ स्वान्तस्वादुस्वदेहाय नमः ।
ॐ सुखभजनपदाय नमः ।
ॐ महिष्या मण्डिताङ्गाय नमः ।
ॐ स्तोत्रातिक्रान्तकीर्तये नमः ।
ॐ मलिनिमरहितौज्ज्वलाय नमः । २१०।
ॐ इष्टौपवाह्याय नमः ।
ॐ वीताश्चर्यत्रिणेत्रप्रभृतिसुरनुतये नमः ।

## तनुविहितसर्गादिसुभगः

ॐ लोकस्रष्ट्रे नमः ।
ॐ लोकक्रान्त्रे नमः ।
ॐ हृतधरणिभराय नमः ।
ॐ अनन्यभोग्याङ्घ्रियुग्माय नमः ।
ॐ चित्तोद्यन्नीलरूपाय नमः ।
ॐ निरवधिरसदस्वाङ्घ्रये नमः ।
ॐ अध्यक्षमूर्तये नमः ।
ॐ नित्योपास्यस्वपादाय नमः । २२०।
ॐ निखिलवसुमतीगोपनस्वाङ्घ्रिवृत्तये नमः ।
ॐ मूर्तिप्रतीत्या यमपरवशतां मुष्णते नमः ।

## स्वेच्छासेव्याकृतिः

ॐ स्थानोत्कर्षात् सुदीप्ताय नमः ।
ॐ श्रमहरवपुषे नमः ।
ॐ स्वाङ्गपर्याप्तभूषाय नमः ।
ॐ नीचयोगात् तेजिष्ठाय नमः ।
ॐ प्रणमितभुवनाय नमः ।
ॐ संनतानां पावनाय नमः ।
ॐ प्राप्त्यर्हस्थानाय नमः ।
ॐ अंहःप्रशमनविष्याय नमः । २३०।

ॐ बन्धविच्छेदपादाय नमः ।
ॐ शीघ्राभियानक्षमशुभवसतये नमः ।

## निखिलतनुः

ॐ भूतजुष्टाय नमः ।
ॐ भूतकार्यजुष्टाय नमः ।
ॐ शुभनिजवपुषे नमः ।
ॐ दीप्तिमत्पदार्थजुष्टाय नमः ।
ॐ पथ्यास्वादोपपन्नाय नमः ।
ॐ श्रुतिमुखसुभगाशेषशब्दप्रपञ्चाय नमः ।
ॐ नानाकार्पुमर्थजुष्टाय नमः ।
ॐ जगदधिपतिजुष्टाय नमः । २४०।
ॐ चेतनाचेतनौघजुष्टाय नमः ।
ॐ दोषैरदुष्टाय नमः ।

## शुभतनुसुभगः

ॐ ग्राहग्रस्तेभमोक्षाय नमः ।
ॐ सुररिपुदमनाय नमः ।
ॐ गोकुलत्राणकार्याय नमः ।
ॐ गोदार्थोक्षावमर्दाय नमः ।
ॐ सदहितमथनाय नमः ।
ॐ सिन्धुपर्यङ्कयुक्ताय नमः ।
ॐ क्षोणीभारव्यपोहाय नमः ।
ॐ क्षितिधरवसतये नमः । २५०।
ॐ निर्जराराध्याय नमः ।
ॐ विश्वारम्भाय नमः ।

## हरितनुविभवः

ॐ पद्माक्षाय नमः ।
ॐ पापहन्त्रे नमः ।
ॐ मणिरुचये नमः ।
ॐ अमराधीशचिन्त्याङ्घ्रिपद्माय नमः ।
ॐ तत्तादृक्कुन्तलश्रीसुघटितमकुटाय नमः ।
ॐ भावुकप्राप्यपादाय नमः ।
ॐ शुद्धास्वाद्यस्वभावाय नमः ।
ॐ यमभटमथनाय नमः । २६०।
ॐ भक्तधीवृत्तिभाव्याय नमः ।
ॐ नीचोच्चाभीष्टवृत्तये नमः ।

## स्वबहुमतजनस्वामी

ॐ स्फीतालोकातिभूम्ने नमः ।
ॐ पृथुबहुभुजाय नमः ।
ॐ दिव्यमाल्यास्त्रभाजे नमः ।
ॐ सद्वस्त्राकल्पाय नमः ।
ॐ त्रिदशरसकृते नमः ।
ॐ रक्षणौन्मुख्यवते नमः ।
ॐ मुक्तैरुत्तंसिताङ्घ्रये नमः ।
ॐ स्थिरधृतरमाय नमः । २७०।
ॐ श्यामकान्तये नमः ।
ॐ नित्यसत्कान्तये नमः ।

## नित्यदृश्याङ्गः

ॐ चित्ताकृष्टिप्रवीणाय नमः ।
ॐ अभिलपनसुखाय नमः ।
ॐ स्पर्शवाञ्छां दुहानाय नमः ।
ॐ दिदृक्षामातत्त्वानाय नमः ।

ॐ श्रुतिहितसहिताय नमः ।
ॐ आत्मनित्यादराहाय नमः ।
ॐ विश्लेषाक्रोशमृते नमः ।
ॐ स्मरदरतिकराय नमः । २८०।
ॐ दत्तसायुज्यसङ्गाय नमः ।
ॐ बाललौल्यं कुर्वाणाय नमः ।

## स्तुतिविषयतनुः

ॐ रम्यस्थानादियुक्ताय नमः ।
ॐ अमितविभवाय नमः ।
ॐ सत्पथप्रापकाय नमः ।
ॐ सम्यक्सायुज्यदाताय नमः ।
ॐ अनघवितरणाय नमः ।
ॐ सर्वशेषित्वचिह्नाय नमः ।
ॐ प्रख्याताल्ह्यासहस्राय नमः ।
ॐ अवतरणरसिकाय नमः । २९०।
ॐ भुक्तिमुक्तिप्रदानाभिमुखाय नमः ।
ॐ त्रैलोक्योत्पादकाय नमः ।

## अघशामनतनुः

ॐ प्रादुर्भावानुभाववते नमः ।
ॐ पावनालङ्क्रियाय नमः ।
ॐ जैत्रव्यापारयुक्ताय नमः ।
ॐ अघटितघटनाय नमः ।
ॐ देवभावप्रसिद्धाय नमः ।
ॐ आश्चर्यक्रीडनाय नमः ।
ॐ सरसिजनिलयानन्दनाय नमः । ३००।
ॐ छन्दवृत्तये नमः ।
ॐ ऐश्वर्यव्यक्तिमते नमः ।

## सुस्थिरैश्वर्यसीमा

ॐ श्रीमते नारायणाय नमः ।
ॐ स्वाम्यनुगुणमकुटाय नमः ।
ॐ वीरदामाङ्कमौलये नमः ।
ॐ दुर्दान्ताराातिहन्त्रे नमः ।
ॐ अद्भुतनियततनवे नमः ।
ॐ कल्पपाथोधितल्पाय नमः ।
ॐ विश्वाद्यज्योतिषे नमः ।
ॐ उर्वीधरफणिशयनाय नमः । ३१०।
ॐ वेदरूपस्वकेतवे नमः ।
ॐ निर्धूताशेषदोषाय नमः ।

## सम्पन्नानेकभोग्यः

ॐ शैत्यमहिततुलसीमालाय नमः ।
ॐ वटदलशयनाद्यर्हणीयापदानाय नमः ।
ॐ सौगन्ध्यमहिततुलसीमालाय नमः ।
ॐ रिंचिरुचिरतुलसीमालाय नमः ।
ॐ पोषणमहिततुलसीमालाय नमः ।
ॐ आभिरूप्यमहिततुलसीमालाय नमः ।
ॐ सन्दर्भमहिततुलसीमालाय नमः ।
ॐ पुष्पसङ्ग्महतितुलसीमालाय नमः । ३२०।
ॐ शङ्खचक्राधीशयुक्ताय नमः ।
ॐ महिततुलसीमालाय नमः ।

## आन्योन्यात्मत्वयोगवान्

ॐ चेतोगन्धानुलेपाय नमः ।
ॐ स्तुतिवचनकृतस्रजे नमः ।
ॐ स्तुतिवचनकृतपटाय नमः ।
ॐ अञ्जल्युपातालङ्काराय नमः ।
ॐ प्राणवासिने नमः ।
ॐ चेतनेन कलितवरशिरोभूषणाय नमः ।
ॐ भक्त्या कलितकिरीटमुख्याय नमः ।
ॐ शीर्ष्णा सत्पादुपीठाय नमः । ३३०।
ॐ स्वतनुसदनतामात्मरूपे वितन्वते नमः ।
ॐ अन्योन्यात्मत्वयुक्ताय नमः ।
ॐ प्रभवे नमः ।

## निखिलतनुः

ॐ (वियोगे) भूय्यद्यैर्वस्तुभिः भक्तान् व्यथयते नमः ।
ॐ सागराद्यैर्वस्तुभिः भक्तान् व्यथयते नमः ।
ॐ ज्वलनमुखैर्वस्तुभिः भक्ता व्यथयते नमः ।
ॐ शशिमुखैर्वस्तुभिः भक्तान् व्यथयते नमः ।
ॐ वत्सपूर्वैर्वस्तुभिः भक्तान् व्यथयते नमः ।
ॐ नृत्यद्भिः भक्तान् व्यथयते नमः ।
ॐ स्वैः लोकादिभिः भक्तान् व्यथयते नमः । ३४०।
ॐ पृथिवीक्षिद्भिः भक्तान् व्यथयते नमः ।
ॐ आत्मीयदासैः भक्तान् व्यथयते नमः ।
ॐ सौलभ्यैश्वर्यवर्गैः गुणगणैः भक्तान् व्यथयते नमः ।

## स्वजनकृतकृतार्हीकृतिः

ॐ आपन्नानन्यबन्धवे नमः ।
ॐ सरसिजनिलयावल्लभाय नमः ।
ॐ सान्द्रमोदाय नमः ।

ॐ भक्ताघध्वंसशीलाय नमः ।
ॐ तदुचितसमयाश्वासदानप्रवीणाय नमः ।
ॐ कर्पूरालेपशोभाय नमः ।
ॐ समाधिकरहिताय नमः । ३५०।
ॐ तोषकाय नमः ।
ॐ सर्वपूर्णाय नमः ।
ॐ कृष्णाय नमः ।

## स्नेहवैद्यः

ॐ इच्छासारथ्ययुक्ताय नमः ।
ॐ प्रहरणनवयुते नमः ।
ॐ श्रीतुलस्याढ्यमौलये नमः ।
ॐ स्तुत्याङ्घ्रियुक्ताय नमः ।
ॐ नामसङ्कीर्तनप्रणयिभिषजे नमः ।
ॐ पादधूलिप्रणयिभिषजए नमः ।
ॐ स्वजनभजनतत्पादधूलिप्रणयिभिषजे नमः । ३६०।
ॐ स्वजननमःप्रणियिभिषजे नमः ।
ॐ स्वजनमूलस्वाङ्घ्रिस्तुतिप्रणयिभिषजे नमः ।
ॐ तदितरभजनत्यागपूर्वोपसत्तिप्रणयिभिषजे नमः ।

## सद्गुणौघसंयुक्तः

ॐ आपद्बन्धुत्वदीप्ताय नमः ।
ॐ निरवधिकमहानन्ददाय नमः ।
ॐ क्रान्तलोकाय नमः ।
ॐ देवतानां दुर्दर्शाय नमः ।
ॐ अनुपधिपित्रे नमः ।
ॐ सर्वभूतान्तरस्थाय नमः ।
ॐ पूर्णज्ञानैकमूर्तये नमः । ३७०।
ॐ धृतशुभतुलसये नमः ।

ॐ चक्रनाथाय नमः ।
ॐ श्रुतीनां विश्रान्तिस्थानाय नमः ।

## स्वजनपरिहृतोपेक्ष्यः

ॐ आश्रितपरिहरणीयस्वोपेक्ष्यसौन्दर्याय नमः ।
ॐ आश्रितपरिहरणीयस्वोपेक्ष्यहृदयाय नमः ।
ॐ आश्रितपरिहरणीयस्वोपेक्ष्यपूर्णत्वाय नमः ।
ॐ आश्रितपरिहरणीयस्वोपेक्ष्यकान्तये नमः ।
ॐ आश्रितपरिहरणीयस्वानादृतज्ञानाय नमः ।
ॐ आश्रितपरिहरणीयस्वानादृतप्रकाशाय नमः ।
ॐ आश्रितपरिहरणीयस्वानादृतवलयाय नमः । ३८०।
ॐ आश्रितपरिहरणीयस्वोपेक्ष्यरशनाय नमः ।
ॐ आश्रितपरिहरणीयस्वानादृतवर्ष्मणे नमः ।
ॐ आश्रितपरिहरणीयस्वोपेक्षितात्मस्वरूपाय नमः ।

## इष्टार्थरूपः

ॐ कारुण्यादब्धिमाथिने नमः ।
ॐ तदुपरिशयिताय नमः ।
ॐ तत्समानाङ्गवर्णाय नमः ।
ॐ स्वदाने ख्यातौदार्याय नमः ।
ॐ रुचिरमणिरुचये नमः ।
ॐ वेषतोऽतीव भोग्याय नमः ।
ॐ आत्मत्वेनानुभाव्याय नमः । ३९०।
ॐ दुरधिगमपदाय नमः ।
ॐ बन्धमोक्षस्वतन्त्राय नमः ।
ॐ स्वान्यप्रेमोपरोधिने नमः ।

## सर्वामरोच्चः

ॐ कल्पान्तेऽपि स्थिताय नमः ।
ॐ सकलसुरगणस्रष्ट्रे नमः ।
ॐ जनानां रक्षाद्यापादकाय नमः ।
ॐ शिवविधिभरणाय नमः ।
ॐ सर्वदेवात्मने नमः ।
ॐ तत्तत्कर्मानुरूपफलवितरणाय नमः ।
ॐ वैनतेयध्वजाय नमः । ४००।
ॐ मार्कण्डेयावनाय नमः ।
ॐ अपरिच्छिन्नाय नमः ।
ॐ चिदचिद्वर्गेष्वप्यजहत्स्वभावाय नमः ।

## कारुण्याधीनवृत्तिः

ॐ चक्रस्फायत्कराय नमः ।
ॐ स्वजनवशाय नमः ।
ॐ रक्षणोद्युक्ताय नमः ।
ॐ भव्याय नमः ।
ॐ स्वात्मदात्रे नमः ।
ॐ अमलतनवे नमः ।
ॐ श्रीगजेन्द्रावनाय नमः । ४१०।
ॐ नानाबन्धुत्वयुक्ताय नमः ।
ॐ विपत्सखाय नमः ।
ॐ व्याजमात्राभिलाषाय नमः ।

## स्वभक्तैः जगदघशमनः

ॐ पाथोधिप्रौढकान्तये नमः ।
ॐ सरसतुलसिकालङ्कृताय नमः ।
ॐ दात्रे नमः ।
ॐ वैकुण्ठाय नमः ।

ॐ चक्रप्रहरणाय नमः ।

ॐ वशिने नमः ।

ॐ देवतास्थापकाय नमः । ४२०।

ॐ स्वानामच्यावकाय नमः ।

ॐ सकलनियमनाय नमः ।

ॐ सर्वकर्मज्ञ्याय नमः ।

## स्वानां प्रेमजनकः

ॐ ज्योतीरूपाङ्गकाय नमः ।

ॐ सरसिजनयनाय नमः ।

ॐ अनिष्टविध्वंसकाय नमः ।

ॐ मेघौघश्यामलाय नमः ।

ॐ श्रितसरसाय नमः ।

ॐ उत्कृष्टसौलभ्याय नमः ।

ॐ रक्षायां सावधानाय नमः । ४३०।

ॐ सुभगतनवे नमः ।

ॐ सोपकाराय नमः ।

ॐ अस्त्रवते नमः ।

## जगदवनमहादीक्षितः

ॐ आपद्बन्धुत्वकीर्तये नमः ।

ॐ यदुकुलजननाय नमः ।

ॐ धीरवीरत्वकीर्तये नमः ।

ॐ लोकविक्रान्ताय नमः ।

ॐ आश्रितदुरितहर्त्रे नमः ।

ॐ अद्भुतचेष्टिताय नमः ।

ॐ चक्राद्यस्त्रान्विताय नमः । ४४०।

ॐ कमलनयनतासम्पन्नाय नमः ।

ॐ वामनाय नमः ।

ॐ क्षीराब्धौ शेषशायिने नमः ।

## स्वानामजस्रं स्मृतिविषयः

ॐ शङ्खाद्यैर्मनोज्ञाय नमः ।
ॐ यज्ञसूत्रादिभूषिताय नमः ।
ॐ शार्ङ्गमुख्यैर्मनोज्ञाय नमः ।
ॐ तुलसीमालालङ्कृताय नमः ।
ॐ बिम्बोष्ठाद्यैर्मनोज्ञाय नमः ।
ॐ सुनासाव्रततिमनोज्ञाय नमः ।
ॐ निरवधिज्योतिरूर्जस्विमूर्तये नमः । ४५०।
ॐ नेत्राब्जाद्यैर्विभूषिताय नमः ।
ॐ अशेषाभरणसुषमाय नमः ।
ॐ स्वैर्भक्तैर्मनोज्ञाय नमः ।

## अहंबुद्धिबोध्यः

ॐ जगत्याः स्रष्ट्रे नमः ।
ॐ सकलविधकलावर्तकाय नमः ।
ॐ भूतान्तर्यामिणे नमः ।
ॐ कृत्युद्धरणपराय नमः ।
ॐ भूभरापाकर्त्रे नमः ।
ॐ शैलेन्द्रोद्धारणाय नमः ।
ॐ स्वजनहिताय नमः । ४६०।
ब्रह्मरुद्रेन्द्ररूपिणे नमः ।
ॐ दुष्कर्मोन्मूलनाय नमः ।
ॐ शुभाशुभफलप्रदाय नमः ।

## दीनानां शरण्यः

ॐ सर्पाधीशेशाय नमः ।
ॐ अरिदरभरणाय नमः ।
ॐ सानुकम्पाय नमः ।
ॐ सत्सहायाय नमः ।
ॐ अशेषान्तरनिलयाय नमः ।
ॐ भूसमुद्धर्त्रे नमः ।
ॐ सर्वेषां ताताय नमः । ४७०।
ॐ इतरजनदुराधर्षाय नमः ।
ॐ दीनशरण्याय नमः ।
ॐ देवतासार्वभौमाय नमः ।

## स्वरसकृतनिजप्रेष्यतावाञ्छः

ॐ निस्सौहित्यामृताय नमः ।
ॐ स्ववशजनये नमः ।
ॐ अनन्यभावप्रदाय नमः ।
ॐ मर्यादातीतकीर्तये नमः ।
ॐ नलिननयनाय नमः ।
ॐ सुराणां नायकाय नमः ।
ॐ सर्वश्रैष्ठ्यादियुक्तय नमः । ४८०।
ॐ अनितरगतिताद्यावहाय नमः ।
ॐ आसन्नाय नमः ।
ॐ स्वान् दास्ये स्वे स्थापयित्रे नमः ।

## श्रितानामत्यासन्नः

ॐ स्वामिने नमः ।
ॐ संश्रितानामुपकरणरसाय नमः ।
ॐ नित्यसेव्यपदाय नमः ।
ॐ स्वेष्टसंश्लेषकाय नमः ।

ॐ सर्वास्वादभूम्ने नमः ।

ॐ कपटवटवे नमः ।

ॐ दारुणापत्सखाय नमः । ४९०।

ॐ दिव्यस्थानोपपन्नाय नमः ।

ॐ भ्रमदरिभरणाय नमः ।

ॐ नारायणाय नमः ।

## शक्तिप्रदः

ॐ प्रादुर्भावादिवृत्तैः स्वीवहृदयं शिथिलयते नमः ।

ॐ वृषगणदमनाय नमः ।

ॐ पूतनाशातनाय नमः ।

ॐ मोहार्थं बुद्धकृत्याय नमः ।

ॐ गिरिवरभजनस्वीकर्त्रे नमः ।

ॐ स्थानभेदवते नमः ।

ॐ तेजोध्वान्तादिभावाय नमः । ५००।

ॐ जलनिधिशयनाय नमः ।

ॐ त्रिपदीभिक्षुकाय नमः ।

ॐ पीयूषस्पर्शाय नमः ।

## देशिकद्वारगम्यः

ॐ चक्रिणे नमः ।

ॐ विपदि सख्ये नमः ।

ॐ बिम्बदृश्याधराय नमः ।

ॐ अब्धिश्यामात्मकान्तये नमः ।

ॐ धृततुलसये नमः ।

ॐ निर्जराधीशाय नमः ।

ॐ रक्ताभास्याङ्घ्रये नमः । ५१०।

ॐ पृथुमकुटाय नमः ।

ॐ आश्चर्यचर्याविशेषाय नमः ।

ॐ लङ्काध्वंसिने नमः ।

## स्वयमभिसरणकृत्

ॐ पूर्णाय नमः ।
ॐ गोपनारीजनसुलभाय नमः ।
ॐ अम्बुराशिविलोडनाय नमः ।
ॐ न्यग्रोधग्रेशयाय नमः ।
ॐ अरिसुभगाय नमः ।
ॐ श्रीमहीवल्लभाय नमः ।
ॐ निर्दोषोत्तुङ्गाय नमः । ५२०।
ॐ निरवधिकयशसे नमः ।
ॐ सद्वशीकारिदृशे नमः ।
ॐ मोक्षस्पर्शेच्छ्या स्वयमभिसरणाय नमः ।

## अघटितघटकः

ॐ सम्पद्दारिद्र्यभावाय नमः ।
ॐ असुखसुखकृते नमः ।
ॐ पत्तनग्रामभावाय नमः ।
ॐ कपटऋजवे नमः ।
ॐ सर्वलोकादिभावाय नमः ।
ॐ दिव्यादिव्याङ्गवते नमः ।
ॐ सुरदितिजगणस्निग्धशात्रुत्वकीर्तये नमः ।
ॐ मातापित्रादिवदुपकारकाय नमः ।
ॐ छायाच्छायादिभावाय नमः ।

## चरित्र्यैः सर्वचित्ताकर्षकः

ॐ रासक्रीडादिकृते नमः ।
ॐ विविधमुरलिकावादनाय नमः ।
ॐ मल्ल्भङ्गकृते नमः ।
ॐ गोपीबन्धाहाय नमः ।
ॐ व्रजजननमुखैः चरितैः सर्वचित्ताकर्षकाय नमः ।
ॐ कंसदैत्यादिभञ्जकाय नमः ।
ॐ निहीनेषु प्रादुर्भावकृते नमः । ५४०।
ॐ असुरभुजवनच्छेदनाय नमः ।
ॐ वैदिकपुत्रानयनकृते नमः ।
ॐ महाभारतयुद्धप्रवर्तकाय नमः ।

## विघटितविजनः

ॐ शङ्खचक्रादिविशिष्टाय नमः ।
ॐ त्रिदशासुराय नमः ।
ॐ सिन्धुशायिने नमः ।
ॐ तद्वदुदाराय ॐ
ॐ अरुणसरसिजाक्षाय नमः ।
ॐ दिव्याभिधानाय नमः ।
ॐ दिव्यचिह्नाय नमः । ५५०।
ॐ देवीसंश्लिष्टाय नमः ।
ॐ अतिसुलभाय नमः ।
ॐ स्वष्वतिस्निग्धाय नमः ।

## स्वानिवितस्तेयदक्षः

ॐ पारम्यवते नमः ।
ॐ पञ्चायुध्विहरणाय नमः ।
ॐ वटदलशयनाय नमः ।
ॐ ब्रह्मणः स्रष्ट्रे नमः ।

ॐ देवानां (वेदानां) स्रष्ट्रे नमः ।
ॐ अतिसुभगाय नमः ।
ॐ अलङ्कृताय नमः । ५६०।
ॐ कुन्दभञ्जकाय नमः ।
ॐ रामादिप्रादुर्भावकृते नमः ।
ॐ सर्वान्तरनिलयाय नमः ।

## धृत्यादेः आदिहेतुः

ॐ परमाय नमः ।
ॐ भव्याय नमः ।
ॐ स्रगभिहितमुखैः सेव्याय नमः ।
ॐ श्रीशाय नमः ।
ॐ ऐश्वर्याय नमः ।
ॐ भूम्ने नमः ।
ॐ स्नेहिने नमः । ५७०।
ॐ आभिरूप्यवते नमः ।
ॐ श्रितपरवशाय नमः ।
ॐ सर्वलोकेशाय नमः ।

## स्वीयायत्तस्वविभूतिद्वयः

ॐ लोकस्रष्टृत्वशक्तिमते नमः ।
ॐ आयुधसुभगाय नमः ।
ॐ जिष्णुसारथये नमः ।
ॐ स्रग्भ्राड् देवेशाय नमः ।
ॐ गरुडरथाय नमः ।
ॐ स्वाश्रिते पक्षपातिने नमः ।
ॐ कान्तिमते नमः । ५८०।
ॐ साम्राज्ययोगिने नमः ।
ॐ अवतरणद्शास्पष्टपारम्याय नमः ।

ॐ श्रियः पतये नमः ।

## अनर्हद्वियोगः

ॐ सर्वात्मने नमः ।
ॐ जगतीक्रमणाय नमः ।
ॐ विष्टपानां संरक्षकाय नमः ।
ॐ शत्रुध्वंसकाय नमः ।
ॐ परत्वाद्यभिमतदशाया पञ्चधवस्थिताय नमः ।
ॐ आश्चर्यभूताय नमः ।
ॐ अण्डकोट्याः निर्वाहकाय नमः । ५९०।
ॐ बुधदयिताय नमः ।
ॐ सर्वशीर्ष्णि अङ्घ्रिदात्रे नमः ।
ॐ मोक्षेच्छोत्पादकाय नमः ।

## शरण्यः

आपत्संरक्षकाय नमः ।
ॐ अर्युपकरणाय नमः ।
ॐ मेघसाम्यभूम्ने नमः ।
ॐ निरतिशयदीप्तिमते नमः ।
ॐ स्वानां विश्वासदात्रे नमः ।
ॐ सुरगणसमाश्रिताय नमः ।
ॐ दिव्यदेशोपसन्नाय नमः । ६००।
ॐ आभिरूप्येण व्यामोहजनकाय नमः ।
ॐ स्वजनविजनयोः नमः ।
ॐ सत्प्रपत्तव्याय नमः ।

## शाठ्याशङ्कासहः

ॐ निस्सङ्ख्याश्चर्ययोगाय नमः ।
ॐ अतिमधुराय नमः ।
ॐ जगत्कारणाय नमः ।
ॐ न्यग्रोधार्हत्वभूम्ने नमः ।
ॐ त्रिदशपतये नमः ।
ॐ वाङ्मनस्संनिहिताय नमः ।
ॐ पीयूषस्पर्शनाय नमः । ६१०।
ॐ अखिलपतये नमः ।
ॐ लोकसंरक्षकाय नमः ।
ॐ त्रितनवे नमः ।

## प्रशमितजनतागर्हणः

ॐ श्रीरङ्गे कृतसंनिधानाय नमः ।
ॐ निखिलजगदनुस्रष्ट्रे नमः ।
ॐ रक्षणार्थावताराय नमः ।
ॐ शुचये नमः ।
ॐ विध्वस्तानिष्ठाय नमः ।
ॐ उरगशयनाय नमः ।
ॐ पुंसु कर्मानुरूपं शर्माशर्मप्रदानाय नमः । ६२०।
ॐ उपक्रियातत्पराय नमः ।
ॐ श्रीभूमिदेवीनायकाय नमः ।
ॐ जलदतनवे नमः ।

## स्वगोप्तृत्वं प्रकटयन्

ॐ पद्माक्षत्वेन हृत्स्थाय नमः ।
ॐ परमखनिलयाय नमः ।
ॐ स्वोपकारिणे नमः ।
ॐ विगर्जच्छङ्खाय नमः ।

ॐ अनिष्टप्रहर्त्रे नमः ।
ॐ आदरविलसनकृते नमः ।
ॐ रक्षकाय नमः । ६३०।
ॐ अभ्धिदृश्याय नमः ।
ॐ आपत्संरक्षकाय नमः ।
ॐ श्रीमकरवरलसत्कुण्डलाय नमः ।

## स्फुटजगदवनप्रक्रियः

ॐ विष्टपविक्रान्तिकृते नमः ।
ॐ अमृतमथनकृते नमः ।
ॐ भूतधात्र्युद्धर्त्रे नमः ।
ॐ कल्पे लोकादनाय नमः ।
ॐ क्षितिभरहरणाय नमः ।
ॐ दैत्यराजप्रहर्त्रे नमः ।
ॐ लङ्कसङ्कोचकाय नमः । ६४०।
ॐ असुरभुजवनच्छेत्रे नमः ।
ॐ लोकस्रष्ट्रे नमः ।
ॐ गोवर्धनाद्रिधर्त्रे नमः ।

## सर्वाश्रयं स्वं स्नेहं प्रकटयन्

ॐ साकेते स्थिरचरजनुषां मुक्तिदायकाय नमः ।
ॐ सर्वशो रक्षकाय नमः ।
ॐ चैद्ये सायुज्यदात्रे नमः ।
ॐ जगदुदयकृते नमः ।
ॐ भूमिदेव्युद्धर्त्रे नमः ।
ॐ याञ्चार्थं वामनाय नमः ।
ॐ शिवभजकमुनेर्मोक्षदात्रे नमः । ६५०।
ॐ विरोधिनिवर्तकाय नमः ।
ॐ पाण्डवसारथये नमः ।

ॐ मोक्षदायकाय नमः ।

## स्वीयाक्रन्दापहारी

ॐ नाभीपद्मोज्ज्वलाय नमः ।
ॐ विधिशिवभजनीयाङ्घ्रे नमः ।
ॐ गवां त्रात्रे नमः ।
ॐ सर्वभूतान्तरनियमनाय नमः ।
ॐ संश्रिते भव्याय नमः ।
ॐ लक्ष्मीवक्षसे नमः ।
ॐ ब्रह्माद्यापद्विमोचकाय नमः । ६६०।
ॐ असुरनिरसनाय नमः ।
ॐ त्रातरक्षोनुजाय नमः ।
ॐ पाण्डवरक्षकाय नमः ।

## स्मृतिविशदतनुः

ॐ पद्माकृतिदृशे नमः ।
ॐ अमरतरुलतानासिकाय नमः ।
ॐ लतिकाखण्डसदृश अधराय नमः ।
ॐ इक्षु कोदण्डसदृशभ्रुवे नमः ।
ॐ धवलविद्युदाकार स्मिताय नमः ।
ॐ मकरलसत्कुण्डलाय नमः ।
ॐ अर्धेन्दुवद्भासमानफालाय नमः । ६७०।
ॐ अमलमुखशशिने नमः ।
ॐ प्रलयान्धलारवदतिनीलस्निग्धकोमलसूक्ष्मकेशाय नमः ।
ॐ किरीटिने नमः ।

## विस्मयार्हद्विभूतिः

ॐ पञ्चभूतात्मने नमः ।
ॐ चन्द्रार्यमादिविभवाय नमः ।
ॐ सकलयुगगतवस्त्वात्मने नमः ।
ॐ चेतनाचेतनात्मने नमः ।
ॐ नानालोकनियतिविभवाय नमः ।
ॐ स्मरणतदितरोत्पादकाय नमः ।
ॐ माननादिक्रिते नमः । ६८०।
ॐ दुर्ज्ञेयाय नमः ।
ॐ स्वभाजां बहुशुभकरणाय नमः ।
ॐ वेदसंवेद्याय नमः ।

## स्तुतिकृत्

ॐ स्वामिने नमः ।
ॐ आश्चर्याय नमः ।
ॐ करुणया दत्तवाग्जृम्भणाय नमः ।
ॐ उज्जीवापादकाय नमः ।
ॐ अघटितघटनाशक्तये नमः ।
ॐ वैकुण्ठयोगाय नमः ।
ॐ शुद्धस्वान्ताय नमः । ६९०।
ॐ चक्रायुधाय नमः ।
ॐ जलधिसुतावल्लभाय नमः ।
ॐ पित्रे नमः ।

## स्तुतिकृदघहरः

ॐ वैकुण्ठे नित्ययोगाय नमः ।
ॐ श्रितविवशाय नमः ।
ॐ गरुडारूढाय नमः ।
ॐ अनन्तकीर्त्युज्ज्वलाय नमः ।

ॐ शेषशायिने नमः ।
ॐ रुक्मिण्यभिमताय नमः ।
ॐ सुरजिद्बाणदोःखण्डनाय नमः । ७००।
ॐ ग्राहग्रस्तेभरक्षकाय नमः ।
ॐ अभिरुचितविषये संनिहिताय नमः ।
ॐ शुचये नमः ।

## दर्शनेच्छोः सुदृश्यः

ॐ श्याद्यैः पत्न्यादिमते नमः ।
ॐ रघुयदुकुलोद्भवाय नमः ।
ॐ स्वाश्रितेच्छाधीनेहाय नमः ।
ॐ स्वाश्रितेच्छाधीनविग्रहाय नमः ।
ॐ सकलचिदचितामन्तरात्मत्वभूम्ने नमः ।
ॐ स्वामिने नमः ।
ॐ आनन्दरूपाय नमः । ७१०।
ॐ स्वाश्रितावेध्यखिलगुणाय नमः ।
ॐ ज्ञानिनामप्यदुःखस्थानेच्छापादकाय नमः ।
ॐ सहस्रभुजनयनचरणनाम्ने नमः ।

## निस्सङ्गसुलभः

ॐ तार्क्ष्योद्यद्वाहनाय नमः ।
ॐ शुभनयनाय नमः ।
ॐ नीलमेघाकृतये नमः ।
ॐ आश्चर्योच्चेष्टिताय नमः ।
ॐ योगिभिर्निर्जरैश्च दुरवधराय नमः ।
ॐ स्वेषु व्यालुग्धाय नमः ।
ॐ प्रतिहतिरहिताय नमः । ७२०।
ॐ दुर्जनादृश्याय नमः ।
ॐ लज्जापहारकाय नमः ।

ॐ निस्सङ्गजनसुलभतमाय नमः ।

## विश्लेषभोग्यः

ॐ श्रीभूमीनायकाय नमः ।
ॐ अरिसुकराय नमः ।
ॐ स्वविश्लेपैकाकिने नमः ।
ॐ कल्पसिन्धौ शिशवे नमः ।
ॐ श्रीस्थाने संनिहिताय नमः ।
ॐ सुरहितकरणाय नमः ।
ॐ श्रीनिवासाय नमः । ७३०।
ॐ विष्टपानां विक्रान्तिकृते नमः ।
ॐ विधिदुरधिगमाया नमः ।
ॐ स्वेषु सौलभ्यभूम्ने नमः ।

## श्रितविहितसमग्रस्वभूमा

ॐ दुर्द्दन्तेभीन्द्रभञ्जकाय नमः ।
ॐ शुभनिलयाय नमः ।
ॐ इतरेषां साय्याय नमः ।
ॐ स्वायत्तय नमः ।
ॐ सर्वदिव्यस्थानसंनिहिताय नमः ।
ॐ स्वेनापि दुरवबोधस्वमहिम्ने नमः ।
ॐ श्रितहृदि सततं भाताय नमः । ७४०।
ॐ देवतद्वेषिसङ्गे मित्रामित्रत्वयोगाय नमः ।
ॐ जगदुदयकृते नमः ।
ॐ देवतात्मने नमः ।

## जीवापेक्षाप्रतीक्षः

ॐ आश्चर्येहान्विताय नमः ।
ॐ शुभमकुटाय नमः ।
ॐ स्वाम्यवते नमः ।
ॐ अब्धौ शायिने नमः ।
ॐ जीमूतश्यामलाय नमः ।
ॐ श्रितसुलभाय नमः ।
ॐ पद्मसूर्योपमाङ्गाय नमः । ७५०।
ॐ पाण्डुसूनोः सारथये नमः ।
ॐ अवनिभरहर्त्रे नमः ।
ॐ अन्तरात्मत्वयोगाय नमः ।

## स्वपदवितरणे सज्जः

ॐ श्रीतुलस्या भाताय नमः ।
ॐ श्रितहृदि शयिताय नमः ।
ॐ श्रीद्धवक्षस्काय नमः ।
ॐ आश्चर्योपक्रियाय नमः ।
ॐ सुरगणसेविताय नमः ।
ॐ वैरिविध्वंसकाय नमः ।
ॐ गोविन्दाय नमः । ७६०।
ॐ अशेषाभिमतविषयतोऽभीष्टसच्चित्तकाय नमः ।
ॐ सर्वाकाराद्भुताय नमः ।
ॐ हरिवामनशब्दवाच्याय नमः ।

## स्वजनहृदि रतः

ॐ भव्याय नमः ।
ॐ रक्षकाय नमः ।
ॐ त्रिजगदधिककारुण्याय नमः ।
ॐ गोपाय नमः ।

ॐ नीलाश्माद्रिप्रभाय नमः ।
ॐ स्वजनकृतनिजात्मप्रदानप्रभवे नमः ।
ॐ मन्दस्मित्या हृदि स्थिताय नमः । ७७०।
ॐ सुकृतिषु अतर्कितानुग्रहाय नमः ।
ॐ प्रलयकाले स्वोदरधृतसमस्तजगते नमः ।
ॐ स्वानां चित्तानपेताय नमः ।

## स्वदास्यं प्रकटयन्

ॐ प्रसाधन्येन हृदि भाताय नमः ।
ॐ विभुतयालं नमः ।
ॐ पराय नमः ।
ॐ मधुराय नमः ।
ॐ देहदेह्यादिषु गताय नमः ।
ॐ स्वस्वरूपप्रकाशकाय नमः ।
ॐ निस्सङ्गप्राप्याय नमः । ७८०। ।
ॐ अन्त्यस्स्मृत्याप्याय नमः ।
ॐ स्वपरमपुरुषैक्यभ्रमध्वंसकाय नमः ।
ॐ ज्ञानाज्ञानप्रदाय नमः ।

## स्वदास्यनिष्ठां प्रकटयन्

ॐ स्वमूर्तिविलक्षणाय नमः ।
ॐ मकुटमुखमहाभूषणैर्भूषिताय नमः ।
ॐ स्वार्हानेकायुधाय नमः ।
ॐ प्रलयसखाय नमः ।
ॐ उज्जीवने कर्षकाय नमः ।
ॐ सम्पन्निरवधिकाय नमः । ७९०।
ॐ अनन्तशयनाय नमः ।
ॐ नीरस्मानवर्णाय नमः ।
ॐ आश्चर्यचेष्टाय नमः ।

## स्वदास्यविधिं प्रकटयन्

ॐ स्वकीयेषु व्यामुग्धाय नमः ।
ॐ अमलघनरुचे नमः ।
ॐ वामनाय नमः ।
ॐ आपद्बन्धवे नमः ।
ॐ आश्चर्यभावाय नमः ।
ॐ अहितनिरसनाय नमः ।
ॐ लोकसृष्ट्यादिशक्ताय नमः । ८००।
आब्धौ शायिने नमः ।
ॐ श्रितदुरितहृते नमः ।
ॐ अतसीपुष्पकान्त्याकर्षकाय नमः ।

## हितः - एकबन्धुः

ॐ आपद्बन्धुत्वकीर्तये नमः ।
ॐ दृढमतिजनकाय नमः ।
ॐ दैत्यनाशाय भूमौ ज्ञानाय नमः ।
ॐ अजत्वेषि जानाय नमः ।
ॐ उत्तरस्यां पुरि मधुरपदालङ्कृत्जां जाताय नमः ।
ॐ भूमौ जाताय नमः ।
ॐ बन्धवे नमः । ८१०।
डयाब्धये नमः ।
ॐ एकसहायाय नमः ।
ॐ पुमर्थभूतपादाय नमः ।

## सुचिरकृतदयः

ॐ लक्ष्मीसम्बन्धभूम्ने नमः ।
ॐ मितधरणये नमः ।
ॐ पद्मनेत्रत्वयोगाय नमः ।
ॐ स्थित्याद्यैः स्वैः चरित्रैः श्रितहृदपहरणाय नमः ।
ॐ श्रीगजेन्द्रावनाय नमः ।
ॐ तार्क्ष्यासावधिरुह्यारिगणनिरासकाय नमः ।
ॐ देवदुश्शापाय नमः । ८२०।
ॐ दीप्तिमते नमः ।
ॐ क्रूरचेष्टितदिव्यायुधाय नमः ।
ॐ दुष्कर्मोन्मूलनाय नमः ।

## शीलरत्नाकरः

ॐ नैकश्रीनामवते नमः ।
ॐ जगदुदयसुसंस्थापकाय नमः ।
ॐ हरये नमः ।
ॐ मोक्षस्य दात्रे नमः ।
ॐ हेयप्रतिभटाय नमः ।
ॐ घटकश्रेणिसम्पत्तिमते नमः ।
ॐ प्रह्लादाह्लादकाय नमः । ८३०।
ॐ वृषगिरिकटके संनिधानाकृते नमः ।
ॐ शेषशायिने नमः ।
ॐ शर्वादेः स्वाङ्गदात्रे नमः ।

## स्वस्वामित्वादिबन्धात् जगदवनकृत्

ॐ लक्ष्मीवक्षस्काय नमः ।

ॐ स्वजनसुलभाय नमः ।

ॐ पर्वतोद्धारकाय नमः ।

ॐ सुरादेः दुर्ज्ञेयाय नमः ।

ॐ अखिलपतये नमः ।

ॐ नकिनां वृद्धाय नमः ।

ॐ स्वेषां हृद्वासिने नमः । ८४०।

ॐ स्वजनवशाय नमः ।

ॐ स्वजनासक्तिभूम्ने नमः ।

ॐ स्वस्वामित्वादिबन्धात् रक्षकाय नमः ।

## स्वगुणगरिमसंस्मारकः

ॐ प्राणाय नमः ।

ॐ अद्भुताय नमः ।

ॐ सुविदिताय नमः ।

ॐ भव्यत्वयोगाय नमः ।

ॐ लक्ष्मीवक्षस्काय नमः ।

ॐ रघुकुलजननाय नमः ।

ॐ नीलरत्नाभमूर्तये नमः ।

ॐ कृष्णाय नमः ।

ॐ अब्जदृशे नमः ।

ॐ परमपतये नमः ।

## विस्मर्तुमशक्यः

ॐ आश्चर्येहान्विताय नमः ।

ॐ अखिलपतये नमः ।

ॐ अन्तरात्मने नमः ।

ॐ अशक्ये शक्तत्वभूम्ने नमः ।

ॐ जलदतनवे नमः ।

ॐ भव्यताकर्षकाय नमः ।
ॐ औदार्यादेर्विशिष्टाय नमः । ८६०।
ॐ नीलजलपूर्णवलाहकसदृशाय नमः ।
ॐ दोश्चतुष्कवते नमः ।
ॐ भवभृतां रक्षणे तीव्रसङ्गाय नमः ।

## घटकमुखविस्रम्भणीयः

ॐ श्रीतुलस्या रम्याय नमः ।
ॐ श्रितजनसहिताय नमः ।
ॐ पद्माक्षाय नमः ।
ॐ स्वामिने नमः ।
ॐ सत्परंज्योतिरिति कथिताय नमः ।
ॐ श्रीधराय नमः ।
ॐ अतिकीर्तये नमः । ८७०।
ॐ पुष्पश्यामलाय नमः ।
ॐ रथचरणमुखस्वायुधाय नमः ।
ॐ आसन्नाय नमः ।

## सुमज्ज्ञानिः

ॐ स्मासन्नभावाय नमः ।
ॐ वल्लीमध्यसुमज्ज्ञानये नमः ।
ॐ जगति सुविदितश्रीवचोवाच्याय नमः ।
ॐ नीलावल्लभाय नमः ।
ॐ भूमाद्यैश्वर्ययुक्ताय नमः ।
ॐ अवतरणदशासहवराय नमः ।
ॐ दुरितहराय नमः । ८८०।
ॐ सुबोधप्रदाय नमः ।
ॐ ब्रह्मादिदुर्दर्शाय नमः ।
ॐ सन्धातृसुमज्ज्ञानये नमः ।

## सिद्ध्युन्मुखसमयः

ॐ पद्माक्षत्वप्रसिद्धाय नमः ।
ॐ जगद्वनाय नमः ।
ॐ भव्याय नमः ।
ॐ सारग्राहिणे नमः ।
ॐ वेणुनादैः हृषितजनाय नमः ।
ॐ अजादेः स्वाङ्गदानाय नमः ।
ॐ श्यामाय नमः । ८९०।
ॐ गव्यचोराय नमः ।
ॐ सरसस्मेरचेष्टत्वभूम्ने नमः ।
ॐ दुस्सहविरहाय नमः ।

## वेलाप्रतीक्षः

ॐ सर्वश्रेष्ठाय नमः ।
ॐ स्वकीयैरपि जगद्वनाय नमः ।
ॐ अण्डषण्डाधिपतये नमः ।
ॐ नीलावल्लभाय नमः ।
ॐ अमृतवितरणाय नमः ।
ॐ भक्तसुस्निग्धाय नमः ।
ॐ दासानां सत्याय नमः । ९००।
ॐ अतिसुजनाय नमः ।
ॐ जगत्कारणाय नमः ।
ॐ श्रीमते नमः ।

## सद्गतिः

ॐ दैत्यानां नाशकाय नमः ।
ॐ विधृततुलसिकामौलये नमः ।
ॐ जयिने नमः ।
ॐ सर्पाधीशेशयाय नमः ।
ॐ निरवधिकपरंज्योतिषे नमः ।
ॐ उल्लास्यभावाय नमः ।
ॐ लोकस्रष्टृत्वयोगाय नमः । ९१०।
ॐ दशरथसुताय नमः ।
ॐ श्रान्तिहारिणे नमः ।
ॐ कामरूपाय नमः ।

## आध्वक्लेशापहर्ता

ॐ श्रीकेशवाय नमः ।
ॐ अद्भुतचरिताय नमः ।
ॐ खगाधीशकेतवे नमः ।
ॐ आसन्नाय नमः ।
ॐ पत्यै नमः ।
ॐ अमरपरिषदामादिभूताय नमः ।
ॐ सृष्टिमुख्यव्यापाराय नमः । ९२०।
ॐ भुजगशायिने नमः ।
ॐ वामनाय नमः ।
ॐ माधवाय नमः ।

## अस्थानस्नेहशङ्कास्पदरसः

ॐ अम्भोजाक्षत्वकीर्तिमते नमः ।
ॐ यदुकुलजननाय नमः ।
ॐ प्रियोद्यद्वचनपराय नमः ।
ॐ चक्रराजायुधाय नमः ।

ॐ श्रीनीलाश्मप्रभाय नमः । ९३०।
ॐ अतिसुभगाय नमः ।
ॐ गोपनिर्वाहकाय नमः ।
ॐ गोपनिर्वाहकाय नमः ।

## भजद्भिः सुगमः

ॐ श्रीमद्दामोदराय नमः ।
ॐ अमरपरिषदामप्यगम्यत्वभूम्ने नमः ।
ॐ चक्राधीशायुधाय नमः ।
ॐ वटदलशयनाय नमः ।
ॐ नागराजेशयाय नमः ।
ॐ मोक्षस्पर्शोन्मुखाय नमः ।
ॐ परमपुरुषाय नमः । ९४०।
ॐ दुष्प्रापाय नमः ।
ॐ उपायोपदेष्ट्रे नमः ।
ॐ माधवत्वादियिगाय नमः ।

## बहुविधभजनप्रक्रियः

ॐ नाम्नां सङ्कीर्तनेन भुविधभजनप्रक्रियाय नमः ।
ॐ स्वपरिबृढतया भावनातो भजनीयाय नमः ।
ॐ सृष्ट्यादिबहुविधरक्षणाय नमः ।
ॐ अनुवेलं संस्मृत्या भजनीयाय नमः ।
ॐ पुष्पदानैः भजनीयाय नमः ।
ॐ वेङ्कटाचलवासिने नमः ।
ॐ अध्ययनभजनीयाय नमः । ९५०।
ॐ निर्वचनभजनीयाय नमः ।
ॐ स्तोत्रनृत्यादिकृत्यैः वर्णाश्रमधर्मैश्च
बहुविधभजनप्रक्रियाय नमः ।
ॐ दीर्घबन्धवे नमः ।

## स्वपदवितरणे तीव्रोद्यमः

ॐ चक्रिणे नमः ।
ॐ केशवाय नमः ।
ॐ श्रीशनारायणाय नमः ।
ॐ पाण्डवानां स्नेहिने नमः ।
ॐ अभिमततुलसीपूजनीयाय नमः ।
ॐ अम्भोजाक्षाय नमः ।
ॐ गोविन्दाय नमः । ९६०।
ॐ सुयशसे नमः ।
ॐ श्रीपतये नमः ।
ॐ अलभ्यलाभप्रदाय नमः ।

## स्वजनतनुकृतात्यादरः

ॐ हृदयगततया अत्याश्चर्यस्वभावाय नमः ।
ॐ स्वस्तुतौ प्रेरकाय नमः ।
ॐ स्वामिने नमः ।
ॐ सर्वभूतान्तरमिलयाय नमः ।
ॐ वस्तुतौ कर्त्रे नमः ।
ॐ आपद्बन्धये नमः ।
ॐ ब्रह्मरुद्रादिसर्वदेवस्तुताय नमः । ९७०।
ॐ बहुविधसविधस्थानवते नमः ।
ॐ कालादीनामेककारणाय नमः ।
ॐ मायानिवर्तकाय नमः ।

## स्वयमनुपधितः तुष्टः

ॐ लक्ष्मीकान्ताय नमः ।
ॐ विपदि सख्ये नमः ।
ॐ दिव्यदेशस्थिताय नमः ।
ॐ मोक्षोद्युक्ताय नमः ।
ॐ मोक्षार्थं कृतशपथाय नमः ।
ॐ सर्वतः संनिहिताय नमः ।
ॐ दृष्यन्तःसंनिवासाय नमः । ९८०।
ॐ अतिवितरणाय नमः ।
ॐ स्वस्वभावप्रकाशकाय नमः ।
ॐ स्वामिने नमः ।

## सुखार्चिर्मुखसरणिमुखः

ॐ स्वामिने नमः ।
ॐ श्रीशनारायण इति यशस्विने नमः ।
ॐ विष्टपानां विक्रान्त्रे नमः ।
ॐ श्रीश इति यशस्विने नमः ।
ॐ चक्रवते नमः ।
ॐ जलनिधिशयनाय नमः ।
ॐ गोविन्दाय नमः ंअमः । ९९०।
ॐ वैकुण्ठस्वामिने नमः ।

## मोक्षदो मुक्तभोग्यः

ॐ ब्रह्मेशान्तःप्रविष्टाय नमः ।
ॐ जलनिधिसुतया संनिरोद्धव्याय नमः ।
ॐ दिव्यश्रीविग्रहाय नमः ।
ॐ अखिलतनवे नमः ।
ॐ अतृप्तपीयूषभावाय नमः ।
ॐ पद्माबन्धवे नमः ।

ॐ भूम्युद्धरणकर्त्रे नमः ।
ॐ पुण्यपापेशित्रे नमः ।
ॐ मुक्तेर्दात्रे नमः । १०००।
ॐ अनुभाव्याय नमः ।

The twin works dramiDopaniShad sAra and dramiDopaniShad tAtparya ratnAvali by Sri Vedanta Desika are the essence and summary of 1102 verses or pasurams of Sri Nammazhwar celebrated under the name of Thiruvaimozhi.

Sri Nammazhwar in his Thiruvaimozhi has brought out the innumerable auspicious attributes of God. Sri Vedanta Desika has culled 1001 auspicious attributes from the verses sung by Sri Nammazhwar and put them in dramiDopaniShad sAra and dramiDopaniShad tAtparya ratnAvali.

The main body of 20 slokas of dramiDopaniShad sAra consisting of 26 slokas in all, present the quintessence of the ten shatakas or centuriums of Thiruvaimozhi. The 100 verses of dramiDopaniShad tAtparya ratnAvali summarize the thousand plus pasurams by Sri Nammazhwar. The essence and philosophy contained in each Thiruvaimozhi as a dashaka or decadium of ten stanzas is summarized in a single shloka by Sri Vedanta Desika.

A new collection of thousand names (sahasranama) has been culled and coined from this by extracting one appropriate name of God from each of the ten stanzas forming the dashaka.

(Source: DLI book - bhaghavan nama sahasram., 5010010079089. sri vedanta desika. 1951.)

Encoded and proofread by Sunder Hattangadi

*bhagavad-sahasranAmAvali (dramiDopaniShad tAtparya ratnAvali)*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*